श्रीमच्छङ्करात् प्राक् अद्वैतवेदान्तः

डॉ. भजहरि-दासः *

Abstract

[उत्तरमीमांसायाः अपरपर्यायमस्ति वेदान्तशास्त्रम् ।एतेषु षट्दर्शनेषु आस्तिकेषु मध्ये अन्यतमं वेदान्तशास्त्रम् । अनेन प्रतीयते यत् अस्य उत्सग्रन्थाः सन्ति वेदाः । ते चतुर्भागात्मकाः । यथा संहिताब्राह्मणा- रण्यकोपनिषदाख्याः इति । तत्र उपनिषद् विभागः वेदान्तपदेन स्वीक्रियते वेदस्य अन्तिमभागत्वात् ।प्रसिद्धिरियं यत् वैदिकमन्त्राणां मध्ये एकवाक्यतां प्रदर्शयितुं सूत्रात्मकानां दर्शनग्रन्थानां विचारः जातः । वेदान्तसूत्रेषु अपि अनेकेषाम् आचार्याणाम् उल्लेखः दृश्यते । यथा जैमिनिः आश्मरथ्यः वादरिः आत्रेयः काशकृत्स्नः कार्ष्णाजिनिः औडुलोमिः इत्यादयः ।एते सर्वे येन केनापि प्रकारेण वेदान्तशास्त्रस्य पुर्वाचार्याः इति । एतेषां मतं प्रदर्शयितुं सम्प्रति मूलग्रन्थाः अनुपलब्धाः । प्रसङ्गानुसारं तत्र उपवर्षः वौधायनः सुन्दरपाण्डः भतृप्रपञ्चः द्रविडाचार्यः भारुचिः कपर्दिः गुहदेवः भतृमित्रः टङ्कः ब्रह्मानन्दी ब्रह्मदत्तः भतृहरिः प्रभृतयः प्रसिद्धाः शास्त्रविदः वेदान्तीनः । एतदनन्तरं प्रस्थानत्रयीनामधेया ग्रन्थाः उपनिषद् ब्रह्मसूत्रं भगवद्गीता इत्यपि सम्प्रदायमध्ये श्रद्धेयाः ।एतेषु आचार्येषु काशकृत्स्नः कार्ष्णाजिनिः आश्मरथ्यः औडुलोमि वादरिः आत्रेयः इत्येते आचार्याः ब्रह्मसूत्रकारात् वादरायणात् पूर्ववर्तिनः । एतेषां विषये इदानीम् आलोच्यते ।]

कुञ्चिकाशब्दाः— अद्वैतवेदान्तः, मीमांसा, गौडपादः, ब्रह्म, जीवः, शङ्कराचार्यः

उत्तरमीमांसायाः अपरपर्यायमस्ति वेदान्तशास्त्रम् । एतेषु षट्दर्शनेषु आस्तिकेषु मध्ये अन्यतमं वेदान्तशात्रम् । अनेन प्रतीयते यत् अस्य उत्सग्रन्थाः सन्ति वेदाः । ते चतुर्भागात्मकाः । यथा संहिताब्राह्मणारण्यकोपनिषदाख्याः इति । तत्र उपनिषद् विभागः वेदान्तपदेन स्वीक्रियते वेदस्य अन्तिमभागत्वात् । संहिताष्वपि सूत्ररूपेण ये देवाः एकस्यैव देवस्य ब्रह्मणः विस्ताररूपाः । यथा श्रुतिः एक अहं बहु स्यामः इति ।

प्रसिद्धिरियं यत् वैदिकमन्त्राणां मध्ये एकवाक्यतां प्रदर्शयितुं सूत्रात्मकानां दर्शनग्रन्थानां विचारः जातः । वेदान्तसूत्रेषु अपि अनेकेषाम् आचार्याणाम् उल्लेखः दृश्यते । यथा जैमिनिः आश्मरथ्यः वादरिः आत्रेयः

* सहायकाचार्यः, संस्कृतपालिप्राकृतविभागे, हिमाचलप्रदेशकेन्द्रियविश्वविद्यालये, धर्मशालायाम्, हिमाचलप्रदेशेषु ; Email : bhajaharidas@zohomail.in

काशकृत्स्नः कार्ष्णाजिनिः औडुलोमिः इत्यादयः । एते सर्वे येन केनापि प्रकारेण वेदान्तशास्त्रस्य पुर्वाचार्याः इति । एतेषां मतं प्रदर्शयितुं सम्प्रति मूलग्रन्थाः अनुपलब्धाः । किन्तु सूत्ररूपेण विभिन्नेषु आर्षग्रन्थेषु पुराणेषु वा यत्र तत्र केचन विचाराः उपलभ्यन्ते ।

पुराणेषु अपि यत्र तत्र वेदान्तशास्त्रस्य चर्चा दृश्यते । प्रसङ्गानुसारं तत्र उपवर्षः, वौधायनः, सुन्दरपाण्डः, भर्तृप्रपञ्चः, द्रविडाचार्यः, भारुचिः, कपर्दिः, गुहदेवः, भर्तृमित्रः, टङ्कः, ब्रह्मानन्दी, ब्रह्मदत्तः, भर्तृहरिः प्रभृतयः प्रसिद्धाः शास्त्रविदः वेदान्तिनः । एतदनन्तरं प्रस्थानत्रयीनामधेया ग्रन्थाः उपनिषद्, ब्रह्मसूत्रं, भगवद्गीता इत्यपि सम्प्रदायमध्ये श्रद्धेयाः । एतेषु आचार्येषु काशकृत्स्नः, कार्ष्णाजिनिः, आश्मरथ्यः, औडुलोमि, वादरिः, आत्रेयः इत्येते आचार्याः ब्रह्मसूत्रकारात् वादरायणात् पूर्ववर्तिनः । एतेषां विषये इदानीम् आलोच्यते ।

आचार्यः काशकृत्स्नः अद्वैतवेदान्ती आसीत् । ब्रह्मसूत्रे तस्य विषये उक्तमस्ति—"अवस्थितेरिति काशकृत्स्नः" [ब्रह्मसूत्रम् १.४.२२] इति । भेदाभेदवादे दोषप्रदर्शनपूर्वकं जीवब्रह्मणोः ऐक्यं प्रतिपादितम् । जीवः देहेन्द्रियसंघातत्वात् ब्रह्मणः भिन्नः । अतः मुक्तिदशायां जीवब्रह्मणोः ऐक्यता नोचिता । अविद्याकल्पितभेदवशात् ब्रह्म एव हि जीवरूपेण भासते । "अस्यैव परमात्मनः अनेनापि विज्ञानात्मभावेन अवस्थानात् उपपन्नमिदम् अभेदेन उपक्रमणमिति (वर्णनारम्भः) काशकृत्स्नः आचार्यः मन्यते"[१] अर्थात् परमात्मनः जीवरूपेण अवस्थानात् जीवपरमात्मनोः अभेदेन एतत् उपक्रमणं युक्तिसङ्गतमिति आचार्यः काशकृत्स्नः मन्यते । ब्रह्म जीवरूपेण भासते अस्मिन् विषये भगवता शङ्कराचार्येण उक्तं तथा च ब्राह्मणम् "अनेन जीवेन आत्मना अनुप्रविश्य नामरूपं व्याकरवाणि" [छान्दोग्योपनिषद् ६.३.२] इति एवं जातीयकं ब्राह्मणवाक्यम् आत्मनः जीवभावेन अवस्थानं प्रदर्शयति । "सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वा अभिवदन् यदास्ते" [तैत्तरीयारण्यकः ३.१२.७] इति एवं जातीयकं मन्त्रवाक्यम् आत्मनः जीवभावं प्रदर्शयति । जीवः ब्रह्मणः कार्यमिति स्वीक्रियते चेत् उपरि उक्तानां श्रुतिवाक्यानां व्याख्या सम्भवति इति पूर्वपक्षः । तदुत्तरे भगवता उक्तं तेजः प्रभृतीनां सृष्टौ जीवस्य पृथक् सृष्टिः श्रुतौ न वर्णितवन्तौ, येन आत्मनः

[१] ब्रह्मसूत्रशाङ्करभाष्यम् १.४.२२

अन्यः तद्विकारः जीवः स्यात् । काशकृत्स्नस्य आचार्यस्य अविकृतः परमेश्वरः जीवः, न अन्य इति मतम् ।

आचार्यः आश्मरथ्यः भेदाभेदवादी आसीत् । "प्रतिज्ञा-सिद्धेर्लिङ्गमाश्मरथ्यः" [ब्रह्मसूत्रम् १.४.२०] इति सूत्रे जीवब्रह्मणोः हि कार्यकारणयोः भेदाभेदौ वर्तेते । अत्यन्तभेदे एकविज्ञानेन सर्वविज्ञानः प्रतिज्ञाविरोधप्रसङ्गात् । अतः जीवपरमात्मनोः अभेदांशं ग्रहणाय विज्ञानात्मनः द्रव्यत्यादिसङ्कीर्तनेन वर्णनारम्भः तद् आत्मविज्ञाने सर्वविज्ञानरूपः प्रतिज्ञासिद्धेः लिङ्गं (ज्ञापकं) इति आचार्यः आश्मरथ्यः मन्यते । अत्र प्रतिज्ञा (हेतुदृष्टान्तेन या सिद्धति सा प्रतिज्ञा आत्मविज्ञानेन सर्वविज्ञानं स्यात् सा प्रतिज्ञा ।) "आत्मनि विज्ञाते सर्वम् इदं विज्ञातं भवति" [बृहदारण्यकोपनिषद् ४.५.६] "इदं सर्वं यद् अयम् आत्मा" [बृहदारण्यकोपनिषद् ४.५.७] इति च । तस्याः प्रतिज्ञायाः सिद्धिं सूचयति एतत् लिङ्गं यत् प्रियसंसूचितस्य आत्मनः द्रष्टव्यत्वादिसङ्कीर्तनम् । यदि हि जीवात्मा परमात्मनः भिन्नः स्यात्, ततः परमात्मविज्ञानेऽपि जीवात्मा न विज्ञातः इति "एक विज्ञानेन सर्वविज्ञानं" यत् प्रतिज्ञातं तत् हानिर्जायते । तस्मात् प्रतिज्ञासिद्ध्यर्थं जीवात्मपरमात्मनोः अभेदांशेन ग्रहणेन उपक्रमणमिति आश्मरथ्यः आचार्यः मन्यते ।[२]

पुनः आचार्यस्य आश्मरथ्यस्य विषये "अभिव्यक्तेरित्याश्मरथ्यः" [ब्रह्मसूत्रम् १.२.२९] अस्मिन् सूत्रे कथयति महर्षिः वादरायणः— अत्र अनवच्छिन्नस्य परमात्मनः प्रादेशमात्रत्वम् (प्रादेशमात्रता-परिच्छिन्नपरिणामयुक्तता) उपपद्यते । कुतः ? अभिव्यक्तेः । उपासकानाम् अनुग्रहाय परमेश्वरः हृदयादिस्थानेषु प्रादेशपरिमाणः अभिव्यज्यते । किन्तु ईश्वरः नियतप्रादेशमात्ररूपेण अभिव्यक्तः भवति । अस्मिन् विषये निश्चयात्मकः हेतुः न दृश्यते । अतः एषा व्याख्या नोचिता इत्याशङ्कायां प्रदेशेषु वा हृदयादिषु उपलब्धिषु स्थानेषु विशेषेण अभिव्यज्यते । अतः परमेश्वरे अपि प्रादेशमात्रश्रुतिः अभिव्यक्तेः उपपद्यते इति आश्मरथ्यः आचार्यः मन्यते ।[३]

आचार्यस्य औडुलोमेः विषये ब्रह्मसूत्रमस्ति यथा "उत्क्रमिष्यत एवं भावादितौडुलोमिः" [ब्रह्मसूत्रम् १.४.२१] "आर्त्विज्यमित्यौडुलोमिस्तस्मै

[२] ब्रह्मसूत्रशाङ्करभाष्यम् १.४.२०
[३] ब्रह्मसूत्रशाङ्करभाष्यम् १.२.२९

हि परिक्रीयते" [ब्रह्मसूत्रम् ३.४.४५] इति च । औडुलोमिः भेदाभेदवादी आसीत् । संसारदशायां ब्रह्मणः अत्यन्तं भिन्नजीवस्य ब्रह्मात्मसाक्षात्कारात् कार्यकारणसंघातात् (शरीरेन्द्रीयसंघातात्) उत्क्रमणं करिष्यतः । परमात्मना एकीभावात् भविष्यत् अभेदं ग्रहणाय "न वै अरे पत्युः कामाय" इत्यादिना वाक्येन जीवस्य वर्णनारम्भः जातः । आचार्यः मुक्तावस्थायां जीवपरमात्मनोः अभिन्नतायाः, संसारदशायां भिन्नतायाः च विषये प्रमाणानि प्रदर्शयति । तथा च श्रुतिः "एषः सम्प्रसादः अस्मात् शरीरात् समुत्थाय परं ज्योतिः उपसम्पद्य स्वेन रूपेण अभिनिष्पद्यते" [छान्दोग्योपनिषद् ८.१२.३] इति । अर्थात् जीवः शरीरात् सम्यग्रूपेण उत्थाय परमज्योतिं साक्षात्कारात् क्वचित् श्रुतिः जीवाश्रयं नामरूपं नदीनिदर्शनेन ज्ञापयति "यथा नद्यः स्यन्दमानाः (प्रवहमानाः) समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्" [मुण्डकोपनिषद् ३.२.८] इति । यथा लोके नद्यः स्वाश्रयम् एव नामरूपं विहाय समुद्रम् उपयन्ति, एवं जीवः अपि स्वाश्रयम् एव नामरूपं विहाय परं पुरुषम् उपैति, इति हि तत्र अर्थः प्रतीयते दृष्टान्तदार्ष्टान्तिकयोः तुल्यतायै" ।[४] अतः अत्र सिद्ध्यति यत्संसारदशायां जीवः सत्यं, जीवब्रह्मणयोः भेदोऽपि सत्यं, तत् औपाधिकं न स्वाभाविकम् । मुक्तिकाले जीवब्रह्मणयोः अभिन्नता भवति सा साधनसाध्या न स्वाभाविकी इति ।

अपरस्य "आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते" [ब्रह्मसूत्रम् ३.४.४५] इति । अस्मिन् सूत्रे आचार्यः औडुलोमिः पूर्वसूत्रस्य संशयस्य सिद्धान्तः दत्तवान् । कर्माङ्गाश्रितोपासनानि किं यजमानकर्तृकानि आहोस्वित् ऋत्विक् कर्तृकाणि इति संशये ऋत्विककर्तृकम् इति आचार्यः औडुलोमिः मन्यते । तदेव भगवत्पादेन उक्तं न एतद् अस्ति स्वामिकर्माणि उपासनानि इति । ऋत्विक् कर्माणि एतानि स्युः इति औडुलोमि आचार्यः मन्यते ।[५]

वादरायणस्य ब्रह्मसूत्रे आचार्यस्य काष्णाजिनेः विषये उक्तमस्ति सम्बद्धसूत्रमस्ति "चरणादितिचेन्नोपलक्षणार्थेति काष्णाजिनिः" [ब्रह्मसूत्रम् ३.१.९] इति । अनुशयस्य अस्तिस्वप्रतिपादनार्थं या श्रुतिः उदाहृता "तत् ये इह रमणीयाचरणाः" [छान्दोग्योपनिषद् ५.१०.१] सा खलुः चरणात्

[४] ब्रह्मसूत्रशाङ्करभाष्यम् १.४.२१
[५] ब्रह्मसूत्रशाङ्करभाष्यम् ३.४.४५

योन्यापत्तिं (जन्मप्राप्तिं) दर्शयति, न अनुशयात्। अन्यत् चरणम्, अन्यः अनुशयः। चरणं चारित्रम् आचारः शीलमिति अर्थान्तम्। अनुशयस्तु भुक्तफलात् कर्मणः अतिरिक्तं कर्म अभिप्रेतम्। श्रुतिश्च कर्मचरणे भेदेन व्यपदिशति—"यथाकारी यथाचारी तथा भवति" [बृहदारण्यकोपनिषद् ४.४.५] इति। "यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि, यानि अस्माकं सुचरितानि तानि त्वया उपास्यानि" [तैत्तरीयोपनिषद् १.११.२] इति। तस्मात् चरणात् योन्यापत्तिः श्रुतेः न अनुशयसिद्धिः इति चेत्? नैषः दौषः। यतः अनुशयोपलक्षणार्था एव एषा चरणश्रुतिः इति काष्र्णाजिनिः आचार्यः मन्यते।[६]

आचार्यः वादरिः वैदान्तिकः आसीत्। मीमांसासूत्रेऽपि अस्य मतम् उल्लिखितमस्ति। सर्वे मनुष्याः वैदिककार्ये अधिकारिनः। जैमिनिः ६.१.२८ सूत्रे एतत् मतं खण्डयति। आचार्यः वादरिः जैमिनेः अपेक्षया पूर्ववर्ती, सगुणब्रह्मवादी आसीत्। एतस्य विषये वेदान्तेसूत्रम् अस्ति "अनुस्मृतेर्वादरिः" [ब्रह्मसूत्रम् १.२.३०] इति। अस्मिन् सूत्रे प्रादेशमात्रहृदयपुण्डरीकस्थेन मनसा अनुस्मृतेः परमेश्वरः प्रादेशमात्रः इति उपचर्यते। प्रादेशमात्रहृदयप्रतिष्ठेन वा अयं (परमेश्वरः) मनसा अनुस्मर्यते (उपासितः), तेन प्रादेशमात्रः इति उच्यते। प्रादेशमात्रत्वेन वा अयम् अप्रादेशमात्रः अपि अनुस्मरणीयः प्रादेशमात्रश्रुत्यर्थवत्तायैः। एवम् अनुस्मृतिः निमित्ता परमेश्वरे प्रादेशमात्रश्रुतिः इति वादरिः आचार्यः मन्यते।[७] अस्य तात्पर्यम् एवमस्ति—प्रादेशमात्रपरिणामविशिष्टः यत् हृदयं, तत्स्थितः प्रादेशमात्रपरिमाणयुक्तमनसा परमेश्वरमुपास्यते। तेन हृदयस्य प्रादेशमात्रतावशात् मनस्मृत्योः परम्परासम्बन्धात् स्मर्यमान् परमेश्वरे आरोपितम्। परमेश्वरस्य प्रादेशमात्रताबोधिकाश्रुतेः आलम्बनम् अर्थात् एवम्प्रकारेण परम्परासम्बन्धे परमेश्वरस्य प्रादेशमात्रताबोधनश्रुतेः तात्पर्यं अवबोधनीयम्। यदि उच्यते चेत् हृदयगतपरिणामं मनःद्वारे स्मृतौ आगमनं करोति, तत् स्मृतिद्वारे परमेश्वरे आरोपितं भवति। अत्र परमेश्वरः स्मृतेः विषयः, स्मृतिः विषयी। एवमेव स्मृतिपरमेश्वरयोः विषयविषयीभेदेन स्मृतिनिष्ठप्रादेशपरिमाणता केन प्रकारेण परमेश्वरे आरोपितं भवति?

[६] ब्रह्मसूत्रशाङ्करभाष्यम् ३.१.९
[७] ब्रह्मसूत्रशाङ्करभाष्यम् १.२.३०

इत्याशङ्कायां व्याख्या प्रदर्शनाय प्रादेशमात्रत्वेन इति प्रयुक्तः ।

पुनः आचार्यस्य वादरेः विषये सूत्रमस्ति "सुकृतदुष्कृते एवेति तु वादरिः" [ब्रह्मसूत्रम् ३.१.११] इति । अस्मिन् सूत्रे चरणशब्देन सुकृतदुष्कृते एव पुण्यपापकर्मणि उच्यते । लोके इष्टादिकारिणि "धर्मं चरति" इति कर्मचरणयोः अभेदेन प्रयोगदर्शनात् । अतः चन्द्रलोकगतानां पुनः अवरोहार्थम् अनुशयः अस्तीति सिद्धम् । "कार्यं वादरिरिस्य गत्युपपत्तेः" [ब्रह्मसूत्रम् ४.३.७] इति । अस्मिन् सूत्रे "सः एनान् ब्रह्म गमयति" [छान्दोग्योपनिषद् ४.१५.५] इति । अत्र किं परं ब्रह्म (निर्गुणः) गन्तव्यम् उत कार्यं ब्रह्म (हिरण्यगर्भः) इति संशये परं ब्रह्म पूर्वपक्षस्य सिद्धान्तः । किन्तु कार्यम् एव ब्रह्म गन्तव्यमिति आचार्यः वादरिः । कुतः ? कार्यस्य एव ब्रह्मणः परिच्छिन्नस्य गन्तव्यत्वोपपत्तेः इति सिद्धान्तः । "अभावं वादरिवाह ह्येवम्" [ब्रह्मसूत्रम् ४.४.१०] इति । अस्मिन् सूत्रे "सङ्कल्पात् एव अस्य पितरः समुतिष्ठन्ति" [छान्दोग्योपनिषद् ८.२.१] इति श्रुत्या विदुषः मनः अस्ति अवगतम् । किं तस्य शरीरेन्द्रियाणि न सन्ति, उत सन्ति, आहोस्वित् कदाचित् सन्ति कदाचित् न सन्ति इति संशये विदुषः शरीरेन्द्रियाणाम् अभावः मन्यते आचार्येण । यस्मात् "मनसा एतान् कामान् पश्यन् रमते" [छान्दोग्योपनिषद् ८.१२.५] इति श्रुतिः विदुषः शरीराद्यभावनम् आह ।

आचार्यस्य आत्रेयस्य विषये ब्रह्मसूत्रम् अस्ति "स्वामिनः फलश्रुतेरित्यात्रेयः" [ब्रह्मसूत्रम् ३.४.४४] इति । अत्र कर्माङ्गाश्रितो उपासनानि किं यजमानकर्तृकाणि आहोस्वित् ऋत्विककर्तृकाणि इति संशयः । अत्र यजमानस्य एव अङ्गाश्रितो उपासनायां कर्तृत्वम् इति आचार्यः आत्रेयः मन्यते । यतः यजमानस्य कर्माङ्गभूतं फलं श्रुतं "वर्षति ह अस्मै वर्षयति ह यः एतद् एवं विद्वान् वृष्टौ पञ्चविधं साम उपास्ते" [छान्दोग्योपनिषद् २.३.२] अर्थात् यः एतदेव ज्ञात्वा वृष्टौ पञ्चविधं साम उपासनां करोति अस्मै मेघं वर्षति इतोऽपि अनावृष्टिवशात् मेघं वर्षयति इति । अतः उपासनायां यजमानस्य कर्तृत्वमिति सिद्ध्यति ।

इदानीं वादरायणात् परवर्तिनां शङ्कराचार्यात् पूर्ववर्तिनां वेदान्तिनां सिद्धान्तानां विषये आलोचना क्रियते ।

भर्तृप्रपञ्चः

आचार्यः भतृप्रपञ्चः ब्रह्मपरिणामवादी आसीत् । कटोपनिषदः

उपरि एभिः भाष्यकृतम् । इदानीमेतत् नोपलभ्यते । बृहदारण्यकभाष्ये शङ्कराचार्येण एतत् भाष्यम् उपनिषदम्मन्यः इति नाम्नि अभिहितम् । बृहदारण्यकभाष्यवार्तिके सुरेश्वराचार्येण भतृप्रपञ्चं सम्प्रदायविद्ब्रह्मवादीरूपेण अभिहितम् । अनेन आचार्येण ब्रह्मसूत्रभाष्यं विरचितम् इति मधुसूदनसरस्वतीभिः उक्तम् । यमुनाचार्यमते एषः आचार्यः भेदाभेदवादी आसीत् । आचार्यभतृप्रपञ्चमते ब्रह्म परमार्थतः सत्यम् एकः जगद्रूपे बहुः । तेन मुक्तेः द्विविधा सत्ता स्वीकृता यथा परामुक्तिः अपरामुक्तिः इति । ब्रह्मणः विकारः जीवः स्वभावतः नाना, न उपाधिवशात् । जीवः कर्ता भोक्ता ज्ञाता ।आचार्यमते जीवः ब्रह्मणः परिणामः । एतस्य जीवस्य परिणामः अष्टप्रकारकः यथा अन्तर्यामी जीवरूपः अव्याकृतः सूत्ररूपः विराट् देवतारूपः जातिः पिण्डरूपः इति । अनेकाः पण्डिताः कथयन्ति एषः आचार्यः द्वैताद्वैतवादी, भेदाभेदवादी च आसीत् । अस्मिन् विषये भगवता शङ्कराचार्येण "तदनन्यत्वमारभ्मणशब्दादिभ्यः" [ब्रह्मसूत्रम् २.१.१४] इति सूत्रस्य वर्णनाप्रसङ्गे उक्तं "ननु अनेकात्मकं ब्रह्म यथा वृक्षः अनेकशाखः एवम् अनेकशक्तिप्रवृत्तियुक्तं ब्रह्म"[८] इति । आचार्येण भतृप्रपञ्चेन द्वैतभावः उभयं समानरूपेण सत्यमिति मन्यते । मोक्षलाभार्थं यथार्थसाधनं केवलं कर्म न केवलं ज्ञानं न, ज्ञानकर्मणोः समुच्चय इति ।

उपवर्षः

अयम् आचार्यः प्राचीनवृत्तिकारः इति प्रसिद्धिः आसीत् । शाङ्करभाष्ये शावरभाष्ये च अस्य नामोल्लेखः दृश्यते । "शब्दः इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" [ब्रह्मसूत्रम् १.३.२८] इति सूत्रस्य व्याख्यानवसरे शङ्कराचार्येण उक्तम्—वर्णा एव तु शब्दः इति भगवान् उपवर्षः । शावरभाष्ये शब्दतत्त्वनिरूपणे अस्ति गकारौकारविसर्ज्जनीया इति भगवान् उपवर्षः इति । अतः उपवर्षः उभयभाष्यकारस्य पूर्ववर्ती आसीत् । एषः महान् वैयाकरणः पाणिनेः गुरुः आसीत् ।

भर्तृहरिः

एषः वेदान्ताचार्यः आसीत् । वाक्यपदीयम् अस्य व्याकरणदर्शनस्य प्रसिद्धग्रन्थः । अस्मिन् ग्रन्थे स्फोटवादस्य प्रतिपादनमस्ति । भर्तृहरेः शब्दब्रह्मवादः स्फोटवादस्य दार्शनिकस्य विकासमात्रमेव । वस्तुतस्तु एषः

[८] ब्रह्मसूत्रशाङ्करभाष्यम् १.२.१४

शब्दाद्वैतवादी आसीत् । तेन उक्तं पश्यन्ती वाक् रूपः शब्दतत्त्वमेव ब्रह्म । तदेव परा वाक् । इदं जगत् तस्य विवर्तः । शब्दब्रह्मणः कालशक्तिः एव हि माया । मायया शब्दब्रह्मणः जगत् स्फुरितं भवति । एतस्य शब्दस्य अर्थरूपे विवर्तत्वात् जगद्व्यापारः सम्भवति । एषः शब्दब्रह्म जगतः नियन्त्रणकर्ता, जीवस्य अन्तर्यामी चित्तत्त्वात् अभिन्नः । अद्वैतवेदान्ते शब्दब्रह्मवादः अत्युच्च स्थाने अस्ति । एनं अवलम्ब्य आचार्यः मण्डणमिश्रः ब्रह्मसिद्धिः इति ग्रन्थं रचितवान् । वाचस्पतिमिश्रेण ब्रह्मतत्त्वसमीक्षा टीका रचिता । स्वकीये वाक्यपदीये ग्रन्थे आरम्भे एव मङ्गलाचरणं करोति आचार्यः भर्तृहरिः—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यत ॥ इति

[वाक्यपदीयम् १.१]

अनादिनिधनम् अक्षरं शब्दतत्त्वं यद् ब्रह्म अर्थभावेन विवर्तते, यतः जगतः प्रक्रिया इति अस्य श्लोकस्य अन्वयार्थः । आद्यन्तः रहित्वात् अर्थात् कालकृत्परिच्छेदात् एषः शुन्यः, देशकृत्परिच्छेदात् मुक्तः, अकारादि अक्षराणां निमित्त्वात् अक्षरः प्रणवात्मकं, पराप्रकृतिः परापश्यन्ती परब्रह्मपरपर्यायः संविद्रूपः शब्दः ब्रह्म, अर्थरूपे स्वरूपात्मकः गोघटादि बाह्यरूपात्मकेन अनेकरूपेण प्रतिभासितं, येन समग्रजगत् सरित् समुद्रादि वनपर्वतादि चराचरं जगत् उत्पन्नं भवतीति अस्य श्लोकस्य अर्थः ।

द्रविडाचार्यः

एषः आचार्यः प्राचीनवैदान्तिकः आसीत् । इतोऽपि एतेन उपनिषद्भाष्यं रचितम् । भगवता शङ्कराचार्येण बृहदारण्यकोपनिषद्भाष्ये एनम् आचार्यं सम्प्रदायरूपेण उल्लिखितम् । श्रीभाष्यकारः २.१.१४ सूत्रभाष्ये यथाह द्रमिडभाष्यकारः इति उक्त्वा द्रमिडाचार्यम् उल्लिखितम् । श्रीभाष्ये १.१.१ सूत्रे द्रमिडभाष्यकारस्य देवतासायुज्यात् भाष्यकृता व्याख्यातं च एवम्प्रकारेण अस्य आचार्यस्य मतम् उद्धृतम् । बहवः पण्डिताः कथयन्ति द्रविडाचार्यः द्रमिडाचार्यः उभयः अभिन्नः अस्ति ।

गौडपादः

एषः आचार्यः भगवतः शङ्कराचार्यस्य परमगुरुः आसीत् । उत्तरगीतासांख्यकारिकयोः भाष्यं गौडपादभाष्यं नाम्नि प्रसिद्धम् । इतोऽपि माण्डूक्यकारिका अस्य आचार्यस्य प्रसिद्धवेदान्तग्रन्थः अस्ति । भगवता

शङ्कराचार्येण **न तु दृष्टान्तभावात्**[९] इति ब्रह्मसूत्रस्य भाष्ये "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते । अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा"[१०] इति माण्डूक्यकारिकायाः श्लोकः उक्तः । भगवान् शङ्कराचार्यः निर्गुणब्रह्मविदानां स्वानुभवप्रसङ्गे ब्रह्मसूत्रे भाष्ये कथयति—"न इतः पूर्वमपि कर्ता भोक्ता वा अहम् आसम्, न इदानीं नापि भविष्यत्काले इति ब्रह्मविद् अवगच्छति"[११] इति । एवम्प्रकारेण—

प्रपञ्चो यदि विद्यत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थत ॥ १.१७
आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा ।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः ॥ २.६
न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ २.३२
स्वतो वा परतो वापि न किञ्चिद्वस्तु जायते ।
सदसत्सदसद्वापि न किञ्चिद्वस्तु जायते ॥ ४.२२
न कश्चिज्जायते जीवः सम्भवोऽस्य न विद्यते ।
एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते ॥ ४.७१

इत्यादि माण्डुक्यकारिकोक्तभावम् अर्थतः गृहीतः । सर्वोपरि विद्वत्समाजे माण्डूक्यकारिका आचार्यस्य गौडपादस्य बृहद् अवदानमस्ति । अस्यां कारिकायां प्रतिपादितम् अद्वैतसिद्धान्तः अजातवादः रूपेण प्रसिद्धमस्ति ।

गोविन्दपादः

एषः आचार्यस्य गौडपादस्य शिष्यः तथा शङ्कराचार्यस्य गुरुः आसीत् । अस्य आचार्यस्य कोऽपि वेदान्तग्रन्थः इदानीं पर्यन्तं नोपलभ्यते । रसायनशास्त्रस्य ग्रन्थः "रसहृदयः" तस्य रचना । एषः भगवत्पादः रसायनप्रक्रियावलेन स्थुलदेहे सहस्रवर्षं जीवितमिति पण्डिताः कथयन्ति इति शम् ।

* * *

[९] ब्रह्मसूत्रशाङ्करभाष्यम् २.१.९
[१०] माण्डूक्यकारिका १.१६
[११] ब्रह्मसूत्रशाङ्करभाष्यम् ४.१.१३

Bibliography

1. *वेदान्तदर्शनम्* (ब्रह्मसूत्रशाङ्करभाष्यसहितम्) ; स्वामी चिद्घनानन्द पुरी ; उद्बोधन कार्यालयः ; कोलकाता ।
2. *छान्दोग्योपनिषद् ;* गीता प्रेस ; गोरखपुरम् ।
3. *तैत्तरीयारण्यकम् ;* राजेन्द्रलाल मित्र ; कलिकातानगरम् ; १८७१ ।
4. *बृहदारण्यकोपनिषद् ;* गीता प्रेस ; गोरखपुरम् ।
5. *ईशादि नौ उपनिषद् ;* गीता प्रेस ; गोरखपुरम् ।
6. *वाक्यपदीयम् ;* डॉ. शिवशङ्कर अवस्थी ; चौखम्बा विद्याभवन ; वाराणसी ; २०१६ ।
7. *ईशादि नौ उपनिषद् ;* माण्डूक्यकारिका ; गीता प्रेस ; गोरखपुरम् ।